## अध्यायानुवाकयोर्लुक्। (६०/१८६०)

मतौ इत्येव। मत्वर्थे उत्पन्नस्य छस्य लुक् भवति अध्यायानुवाकयोः अभिधेययोः। [1]केन पुनरध्यायानु–वाकयोः [2]प्रत्ययः? इदमेव [3]लुग्वचनं ज्ञापकं तद्विधानस्य। विकल्पेन [4]लुगयमिष्यते। गर्दभाण्डशब्दो[5]ऽस्मिन्निति गर्दभाण्डोऽध्यायः, अनुवाको वा गर्दभाण्डीयः (म. भा. २.३८६)। दीर्घजीवितः, दीर्घजीवितीयः। [6]पलितस्तम्भः, पलितस्तम्भीयः॥

## विमुक्तादिभ्योऽण्। (६१/१८६१)

मतौ इत्येव, अध्यायानुवाकयोः इति च। विमुक्तादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति मत्वर्थे अध्यायानुवाकयोरभिधेययोः। विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तोऽध्यायः अनुवाको वा। दैवासुरः।

विमुक्त। देवासुर। वसुमत्। सत्वत्। उपसत्[7]। दशार्हपयस्। हविर्द्धान। मित्री। सोमापूषन्। अग्नाविष्णु। वृत्रहति। इडा। रक्षोसुर। सदसत्। परिषादक्। वसु। मरुत्वत्। [8]पत्नीवत्। महीयल[9]। दशार्ह। वयस्। पतत्रि। सोम। महित्री। हेतु। विमुक्तादिः॥

## गोषदादिभ्यो वुन्। (६२/१८६२)

मतौ इत्येव, अध्यायानुवाकयोः इति च। गोषदादिभ्यः प्रातिपदिकेभ्यः वुन् प्रत्ययो भवति मत्वर्थेऽध्याया–नुवाकयोः[10]। गोषदशब्दोऽस्मिन्निति गोषदकोऽध्यायोऽनुवाको वा। इषेत्वकः। [11]मातरिश्वकः।

गोषद। इषेत्वा। मातरिश्वन्। देवस्यत्वा। देवीरापः। कृष्णोस्याखरेष्टः। [12]दैवींधियम्। रक्षोहण। अञ्जन। [13]प्रभूत। प्रतूर्त। कृशानु। गोषदादिः॥

## तत्र कुशलः पथः। (६३/१८६३)

वुन् इत्येव। तत्र इति सप्तमीसमर्थात् पथिन्शब्दात् कुशलः इत्यस्मिन्नर्थे वुन् प्रत्ययो भवति। पथि कुशलः पथकः॥

## आकर्षादिभ्यः कन्। (६४/१८६४)

[14]तत्र इत्येव, कुशलः इति च। आकर्षादिभ्यः प्रातिपदिकेभ्यः सप्तमीसमर्थेभ्यः कुशलः इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति। [15]आकर्षे कुशलः आकर्षकः। त्सरुकः।

आकर्ष। त्सरु। पिपासा। [16]पिचण्ड। अशनि। अश्मन्। [17]विचय। चय। जय। [18]आचय। अय। नय। निपाद[19]। [20]गद्गद। दीप। ह्लद। ह्लाद। ह्लाद। शकुनि। आकर्षादिः॥

---

1. केन–लुगयमिष्यते नास्ति फ. 2. विहितयोः लुक् ब. 3. प्रत्ययस्य इत्यधिकम् क. 4. च इत्यधिकम् इ. ह. 5. अस्मिन्नध्याये ह, अस्ति इत्यधिकम् क. 6. पलितस्कम्भः पलितस्कम्भीयः क, स्कम्भः स्कम्भीयः ड. 7. सुपर्ण इत्यधिकम् ड. 8. पत्नीवस्तु क. 9. दशार्ण इत्यधिकम् ड. 10. अभिधेययोः इत्यधिकम् क. 11. मतेः इष्वन् इत्यधिकम् क. 12. देवीत्वियम् क. 13. प्रभूत नास्ति क. 14. तत्रैव क. 15. आकर्षके क. 16. पिचिण्ड क. 17. निचय क. 18. आचय नास्ति क. 19. निवाद निच्छाद इत्यधिकम् ह. 20. गद्गद दीप ह्लद नास्ति ह.